# Shri Kamalamba Panchadashakshari Stotram

# श्रीकमलाम्बापञ्चदशाक्षरीस्तोत्रम्

## Document Information

Text title : kamalAmbApanchadashAkSharIstotram

File name : kamalAmbApanchadashAkSharIstotram.itx

Category : devii, puShpAshrIvatsan, devI

Location : doc_devii

Author : Pushpa Srivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Source : Stotra Pushapavali

Latest update : September 27, 2022

Send corrections to : Sanskrit@cheerful.com

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

September 27, 2022

*sanskritdocuments.org*

# श्रीकमलाम्बापञ्चदशाक्षरीस्तोत्रम्

ॐ

श्रीरामजयम् ।

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः ।

ॐ मन्त्रदेव्यै च विद्महे । मातृकायै च धीमहि ।
तन्नः शिवा प्रचोदयात् ॥

ध्यानाष्टकम् ।
सङ्गीतसद्गुरुस्वामित्यागब्रह्मसुकीर्तिताम् ।
गुरुकीर्तनसानन्दां वन्दे श्रीकमलालयाम् ॥ १॥

श्रीदीक्षितकृताश्चर्यनवावरणकीर्तनाम् ।
कीर्तनापूज्यवाग्देवीं वन्दे श्रीकमलाम्बिकाम् ॥ २॥

कमनीयातिलावण्यां कमनीयमृदुस्वराम् ।
कलसुस्वरगानीयां वन्दे श्रीकमलाम्बिकाम् ॥ ३॥

नादोपासनसुप्रीतां नादविद्यातिदेवताम् ।
नादसुस्वरवागर्थां वन्दे श्रीकमलाम्बिकाम् ॥ ४॥

वीणासङ्गीतलोलां च कलवीणास्वरस्वराम् ।
वीणालयां स्वराह्लादां वन्दे श्रीकमलाम्बिकाम् ॥ ५॥

सङ्गीतसुस्वरां वाचां सप्तस्वरसुनृत्यकाम् ।
स्वरविद्यार्थिसंश्रायां वन्दे श्रीकमलाम्बिकाम् ॥ ६॥

सप्तस्वरपरानिष्ठां सप्तस्वरसुविग्रहाम् ।
सप्तस्वरसुपुष्पार्चां वन्दे श्रीकमलाम्बिकाम् ॥ ७॥

कंदधां कमलाम्बां श्रीकादिविद्योपचारिताम् ।
हादिसादीतिमन्त्रार्थां वन्दे मन्त्रस्वरूपिणीम् ॥ ८॥

अथ स्तोत्रम् ।
कल्याणी कलगीर्वाणी काम्भोजकरुणेक्षणा ।
कल्याणसुवसन्तश्रीः कीरवाणीसुखस्वरा ॥ १॥

एकनिष्ठाभिनिध्याता एकाक्षरी सुशङ्करी ।
एकब्रह्मस्वरूपा च एकशब्दस्वरालया ॥ २॥

ईशवामसुपार्श्वा च ईश्वरी जगदीश्वरी ।
ईश्वरानुग्रहापूर्णा ईशसन्नुतपूरणी ॥ ३॥

लक्षणान्वितपादाङ्का शुभलक्षणलक्षिता ।
लगनीया लसद्रागा ललिता ललिताम्बिका ॥ ४॥

ह्रींकारमन्त्रसद्रूपा ह्रींकारमन्त्रमोदिनी ।
ह्रींकारशब्दसाराध्या ह्रींकारशब्दनादिनी ॥ ५॥

हसितोत्पलसौन्दर्या हंसानन्दप्रकाशिनी ।
हंसनादसुसङ्गीता हंसगुह्यप्रसादिनी ॥ ६॥

सङ्गीतसुस्वराराध्या सङ्गीतवरदायिनी ।
सङ्गीतस्वरसान्निध्या सङ्गीतस्वरभूषणी ॥ ७॥

कराब्जधृतवीणा च करवीणास्वरालया ।
स्वराजितसुवीणा च करवीणालयस्वरा ॥ ८॥

हरिकेदारगौला च हरिप्रियसहोदरी ।
हरिनारायणी गौरी हरिकाम्भोजपादभा ॥ ९॥

लसच्छविप्रभारूपा लब्धवर्णा लयालया ।
लालित्यमृदुवाणी च ललितस्वरमाधुरी ॥ १०॥

ह्रींकारस्वरसम्पूर्णा ह्रींकारध्यानभासुरा ।
ह्रींकारमन्त्रगुह्यार्था ह्रींकारबीजगुप्तका ॥ ११॥

सकलार्थप्रदा माता सकलागमचारिणी ।
सकलाधरसँल्लास्या सकलाघप्रणाशिनी ॥ १२॥

कलामयी कलाराध्या कमलालयवैभवा ।
कलसुस्वरमाधुर्या कलगानप्रसादिनी ॥ १३॥

लयशुद्धिसुगाराध्या लयरागरसाकृतिः ।

लसत्सुमुखलावण्या लयारामा लयारमा ॥ १४॥

ह्लींकारलयरागा च ह्लींकारप्रीणिनी सती ।
ह्लींकारमन्त्रपावित्र्या ह्लींकारजपगोचरा ॥ १५॥

श्रींमन्त्रपूजिताध्याता श्रीरागसुन्दरी धरी ।
श्रीरागसुस्वरागीता श्रीरागवाग्विलासिनी ॥ १६॥

श्रीश्च सरस्वतीरूपा श्रीपञ्चदशमन्त्रिणी ।
श्रीषोडशाक्षरीपूज्या मन्त्रप्रकाशिनी परा ॥ १७॥

सर्वानन्दमयी विद्या सर्वानन्दप्रदायिनी ।
सर्वानन्दसुचक्राभा सर्वानन्दसुमङ्गला ॥ १८॥

श्रीचक्रदेवतायै च श्रीपुरायै सुमङ्गलम् ।
रसमेरुसुवासिन्यै सद्रसायै सुमङ्गलम् ॥ १९॥

मङ्गलं मन्त्रवर्णायै श्रीरागिण्यै सुमङ्गलम् ।
मङ्गलं मूकवाग्दायै कादम्बर्यै सुमङ्गलम् ॥ २०॥

त्यागराजगुरुस्वामिशिष्यापुष्पाकृतस्तुतिः ।
अम्बाप्रीता गुरुप्रेर्या अम्बापादसमर्पिता ॥ २१॥

अम्ब नान्योपयुक्ताहं त्वद्भक्तिकीर्तनं विना ।
एतत्सद्भक्तिनैवेद्यं स्वीकुरुष्व मदम्बिके ॥ २२॥

न्यूनानिच्छिद्रसर्वाणि क्षमस्व परदेवते ।
सदा त्वां संश्रिताहं मे क्षिप्रं प्रसीद सात्त्विकि ॥ २३॥

कादिविद्यां न जानामि हादिसादिं च नाम्बिके ।
जानामि त्वं मदम्बेति जानामि त्वत् पदाश्रयम् ॥ २४॥

शब्दावरणदुस्तापं हर मे परमेश्वरि ।
शेषजीवनपर्यन्तं प्रशान्त्यावारयाम्बिके ॥ २५॥

कर्मानुबन्धजालाद्विमोचनं कुरु पावनि ।
शुभोत्तुङ्गे नमस्तुभ्यं ज्ञानं देहि सुनादकम् ॥ २६॥

मङ्गलं ते मदम्ब श्रीर्मया सह सदा वस ।
मङ्गलैतत्सुवाग्देवि कुरु मोक्षसुमङ्गलम् ॥ २७॥

मङ्गलं नादमातस्ते मङ्गलं कमलाम्बिके ।
मङ्गलं ज्ञानसौभाग्ये मोक्षदे शुभमङ्गलम् ॥ २८॥

कंदायै कमलाम्बायै कलगायै सुमङ्गलम् ।
कलहंसस्वरूपिण्यै कल्याण्यै शुभमङ्गलम् ॥

इति सद्गुरुश्रीत्यागराजस्वामिनः शिष्यया भक्तया पुष्पया कृतं
श्रीकमलाम्बापञ्चदशाक्षरीस्तोत्रं गुरौ समर्पितम् ।
ॐ शुभमस्तु ।

Encoded and proofread by N V Vathsan nvvathsan at gmail.com

Copyright Pushpa Srivatsan

*Shri Kamalamba Panchadashakshari Stotram*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on September 27, 2022

Please send corrections to *sanskrit@cheerful.com*